श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

॥ परमपदसोपानम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ परमपदसोपानम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

पक्षीशेऽत्यन्तवीरे द्विजवरसमितौ भोग्यपीयूषवार्धौ
तल्पीभूते वदान्यः प्रमुदित उदितस्सह्यकन्यान्तरीपे।
गोपालस्सन् स्वगीतं विवरितुमिह तां लक्ष्मणार्यात्मना यः
तस्यायं सौदगन्धः किल फणितिषु नस्सुस्थिरस्संप्रवाति॥ **1**॥

प्रारब्धैर्दुरितैर्विलोक्य मनसा चोरेण दुर्दारुणैः
गाढाज्ञानतमिस्रचक्रवशगश्शब्दादयो भोगदाः।
इत्येवासमपङ्गुगर्तपतितो न स्यात्तथैषा किल
प्रोक्ता दिव्यपदाधिरोहणसृतिः वेदावतंसोक्तिभिः॥ **2**॥

शास्त्रार्थान्स्थूलसूक्ष्मान् विदुरपि च कलास्ताश्च सर्वा विबोद्धुम्
दक्षा धर्माध्वरक्षाचरणपटुधियोऽप्यागमान्तार्थदाश्च।
पापद्वन्द्वौघमुक्ता भगवदभिमतेप्साविहीना यदि स्युः
अत्रत्यास्मद्भवस्थित्यभिहतिनिपुणस्येह नारायणस्य॥ **3.1**॥

सदैव लक्ष्मीसहितस्य जात्वपि (चापि??)
श्रियाविनानास्थितदैवतस्य।
सर्वेशतायां दृढतानभिज्ञाः
सोपानमार्गाच्च दृढात् बहिष्ठाः॥ **3.2**॥

श्रीवत्सं वैजयन्तीमपि सह रमया वक्षसाऽलङ्करिष्णोः
वाचो ये वावमन्यन्त इह पुनरविद्यां तदीया व्यथाश्च।
भुक्त्वात्रस्थापयत्तद्भ्रमणमतिचिरात् संसृतौ वीक्ष्य चाथो
निर्विण्णा लज्जमाना उपनिषदुदितोपाय एवाशु यान्ति॥ 4॥

व्योमेवस्थायितावत्तिमिरततिगताचित्प्रकारं चिरेण
काले भूयोऽपि चैकीकृत इव सति कल्पान्त एवान्तमेते।
मांसासृक्कायचक्रभ्रमणनिपततां पुण्यपापात्मकर्म -
स्रोतस्सम्प्लावितानां कमपि तटमनालोकितानां च रीतिम्॥ 5.1॥

क्ष्वेडस्स्वाद्यो यथा स्यान्मधुसहित इहाल्पार्थ एवात्मभोग्यः
ज्यायानर्थस्तथैवं ह्यवगतविषयाणां स्वतश्च प्रकारम्।
एवं ह्यात्मानुभूतिं स्वयमभिविमृशन् यस्तु निर्वेदमेयात्
तस्मैवात्मप्रयत्नाश्शुभफलमहिता नित्यमेधन्त एव॥ 5.2॥

लोके ह्यत्युन्नतानां सुकृतवति फलेऽप्याप्तदुःखाधिकत्वं
तादृग्भोगं समश्नन् निरवधि मुदितो नीरजातासनोऽपि।
कष्टं जन्यैकनित्यक्रियमधुमुखरक्षः कृतं प्राप तादृक्
ज्ञात्वा शास्त्रप्रवीणाः पदजुष ऋजवो नेयुरुग्रं भवं तु॥ 6॥

मानातीतपरिच्छदास्समधिका वित्तेशतादित्वतः
नेमुर्दामधरा धराधिपतयो यान् सार्वभौमांश्च ते।
याता नन्वमृतद्युतिग्रहपती यातौ च तारागणः
नाशं यात्यथ शिष्यते च परमाकाशस्स सूक्ष्मः परः॥ 7.1॥

वृषा च वृषभध्वजो द्विगुणितद्वयास्यश्च ते
न सन्ति हि यदा तदा सकलकारणत्वं च नः।
रमेशितुरवेक्ष्य तं नरकमेव नाकं त्विति
प्रियं च परमं पदं किल गवेषयन्ते बुधाः॥ 7.2॥

सक्तास्त्याज्येषु धर्मेष्वविरत मरता मुक्त्युपायेऽल्पकेऽर्थे
व्यग्रा ये बन्धवस्ते न हि तदिह सहैकेप्सुभिस्स्मोऽथ किं च।
कोपाद्याध्वापनेतुः विविधतनुपरिभ्रान्तिहर्तुर्गुरोर्नः
कारुण्यात् गोप्रियस्येशितुरमलपदं धारयामश्शिरस्सु॥ **8**॥

प्राप्तानीवागमिष्यन्त्यपिमितिरहितानीह भोगादिना न
क्षय्याणीदृंशि दुःखान्युपरि च ददतो तीव्रपापौघवह्नेः।
एधीभूतं च कालं सकलमपि गतं वीक्ष्य भूयोऽपि तद्वत्
न स्युस्संसारगर्ते निखिलमवसरं यापयन्तो यथा न॥ **9.1**॥

दग्धं गर्भगतार्भकं कमपि यो मुग्धं शिशुं निर्ममे
धत्ते यस्तुलसीस्रजं सुरभितां तस्याद्भुतेहावतः।
विध्युक्तिप्रविदश्च मुक्तिविहतिक्षोदीकरिष्यत्त्रयी -
चूडावाक्षु गिरं प्रपत्तिमहितामेकां हितेऽधीयते॥ **9.2**॥

गर्भाविर्भूतदुःखाद्यपसृतिनिरता मुक्तिसक्ताः प्रवृत्ताः
अच्छेद्ये भक्तियोगे तदनु च चिरसाध्येऽक्षमास्तं विहाय।
श्रीमन्नारायणस्यैव हि चरणयुगं ये शरण्यं प्रपन्नाः
स प्रीतस्सर्वदायी स्वयमिति करुणां संप्रतीक्ष्यासतेऽत्र॥ **10**॥

प्रारब्धे पापसङ्घे फलमुखदुरितं चान्तरान्यद्यदंहः
प्रारब्धात् पूर्वपापात् प्रथममखिलमप्युज्जिहायाथ तत्र।
प्रारब्धांशेऽपि किञ्चित् विहितभरनरार्तिप्रकारं विमृश्यै -
तत्साम्यात्मानुकम्पात इह दहनयुक्तूलवत् संप्रदग्ध्य॥ **11.1**॥

त्यक्त्वैवं चोत्तराघे मतिकृतमथ विश्लिष्टमज्ञानपूर्वं
कर्तुं संकल्प्य चांशं मतिकृतमितरं चानुतापादिनाऽत्र।
क्रोडीकृत्याभिगोप्तुस्त्वरुणितकमलाक्षस्य संकल्परीतिं
ये वा सम्यङ् न जानन्त्यथ च पशव एवाष्ट च द्वौ च ते हि॥ **11.2**॥

कोशावास्यसिवच्च मांसमयकायान्तर्वसद्योगिनः
कर्तुं पूर्णनिरन्तसद्गुणपरब्रह्मानुभूत्यात्मनः।
सौरभ्यामृतकान्तिपूर्णतुलसीमालोऽखिलाधीश्वरः
कारेवात्तवपुर्विनाश्य कुरुते रीतिं सुमार्गान्विताम्॥ **12**॥

अक्षाण्यादौ द्विपञ्च स्वमनसि कलयन् प्राणवायौ ततस्ता -
न्येकीकुर्वंश्च जीवे सुगुणवति ततस्सूक्ष्मभूतैस्सहाथो।
सर्वाण्येतानि तानि स्वयमवितुमधिष्ठाय हार्दःप्रभुस्सन्
द्वारैरभ्यन्तरे च द्वययुतनवभिः वर्ष्मणो निर्मितस्य॥ **13.1**॥

दृढबन्धनस्य मूर्धद्वारं चोद्घाटयन्नस्मान्।
परमपदवर्त्म नेतुं सङ्कल्पितवान् हि करुणालुः॥ **13.2**॥

सार्धं ब्रह्मपुरेशजीववपुषा सर्वज्ञहार्देन ये
बन्धात् ब्रह्मपुरात् तदीयकृपया प्रस्थापिता देहिनः।
एतां सादरं अर्चिरादिविबुधैर्मायां समुत्तारिताः
मुक्तिस्था न पुनर्भवाघनिलयावर्तापगावर्तिनः॥ **14**॥

मोक्षं चोपेक्ष्य पूर्वं वयमिह विबुधस्त्रीकटाक्षं विनान्यत्
शस्त्रं नो मीनकेतोर्धनुरपि न विना तत्तनूभिः परं स्यात्।
पीयूषं देवयोषिन्मधुरवचनतो नान्यदित्येव मत्या
व्यामोहं प्राप्तवन्तस्तमखिलमसहं प्राजहामातिशुद्धाः॥ **15.1**॥

संभेदो जलधिर्न चापर इतीवेह ब्रुवाणैर्जनैः
कार्यं चैव हि कारणं त्विति वदद्भिर्दर्शितानध्वनः।
सर्वानर्हपथोऽपि तेरिम वयं किञ्च प्रशस्तं पदं
गन्तुं सत्पथमीक्षिषीमहि परं चानन्दिनोऽभूम च॥ **15.2**॥

तत्तत्संस्कृतिभिर्दृढैर्भवरतैरन्यैरुपायैः पदं
किं वाऽद्यावधि साधितं ह्यजपदाद्येतत् कियत्कालिकम्।
निर्दुःखात्मभरार्पणेन तुलसीमौलेरघोन्मूलिनः
भोग्येनोत्तमवर्त्मनाप्यमतुलं ध्यायेम विष्णोः पदम्॥ 16॥

स्रोतस्विन्यामनादिद्विविधदुरितरूपापगायां पतित्वा
यातेष्वस्मास्वदृष्ट्वा निजनियतिवशात् चञ्चलायां स्थिरायाम्।
माध्वीलिण्मानितेन्दीवरसुमविहरन्त्यां तथैवेन्दिरायां
राजन्त्यां वैजयन्त्यां मणिमयधनुराकारवत्यां च सत्याम्॥ 17.1॥

आकाशे परमे प्रवर्षति कृपां पाथोमुचीवागतां
स्वच्छां तां विरजां विलोक्य शिशिरां श्रीशस्य सङ्कल्पतः।
सन्तीर्याऽमृतवाहिनीं त्वपुनरावृत्त्यात्तपारेक्षिणां
मुक्तानां गतिसत्क्रियाश्च विशदीकर्तुं ह्यभूम क्षमाः॥ 16.2॥

यस्याश्लिष्टोरसि श्रीरुपचितसुमनास्तस्य नः पुण्यहेतोः
नित्यावासप्रधानं निरुपममतिभोग्यं गतास्सम्मिलन्तः।
मुक्तैर्नित्यै रसज्ञापरिचितनिगमान्तस्थसामानुगानं
सर्वं छन्दोनिबद्धं द्रविडकृतिशुभाशासनं कीर्तयाम॥ 18॥

दुर्वारोरुपराक्रमोरगनिगीर्णोऽर्को विमुक्तो यथा
मालिन्यात्तविशोधितातिविमला मुक्ताऽतिमूल्येव च।
पारावारविपत्पराहतिमती नौकेव पारं गता
निर्मुक्तो वनवह्निता परिवृतो दन्तीव सन्तापितः॥ 19.1॥

कान्तेवाश्लिष्टकान्ता वशवितुमवशं क्लेशितास्याऽथ हृष्टा
बन्धादुग्राद्विमुक्तो धरणिपतिसुतो लब्धराज्यो यथा वा।
आत्मानं छादयन्तीं प्रकृतिमिह विहायैव देवादिरूपां
धाम प्राप्यानुभूयोन्नतमतिसुखदं चैकतां प्राप्नवाम॥ 19.2॥

भूमौ मोहं विसृज्य प्रचकितमनसोऽथो फलान्यस्थिराणि
त्यक्त्वा सम्यक् विमुक्तिप्रद इह कमलाक्षान्न चान्यस्समर्थः।
इत्यालोच्यातिभीतास्तदुभयपदपद्माश्रिता उग्रबन्धात्
विस्रस्ताः पारमाप्तुं परमपदमिता अर्चिराद्यैव गत्या॥ **20.1** ॥

तत्रालोक्याद्भुतानि क्षितितलविदिताश्चर्यरीत्यैव सर्वा -
ण्याम्नायं साम गात्वा परमपदलसन्नित्यमुक्तैस्समं च॥
नानारागप्रपञ्चापरिचितमधुरापूर्वरागैकगेयं
गायामानन्तकालं शुभभरितसमाशासनं माधवस्य॥ **20.2** ॥

दुर्वाराखिलदुष्कृते विगलिते पूता वयं प्रस्थिताः
मुक्तिं प्राप्य समाश्रयस्य कमलावक्षोविभूषामणेः।
श्रीनाथस्य नियोजिताः करुणया सेवारसास्वादने
नत्वा तुष्टहृदश्च सद्गुणनुतीरुद्गाय सन्नर्त्य च॥ **21.1** ॥

आकर्ण्याश्रुतपूर्वकर्णमधुरं गानं च सामश्रुतेः
आकालं त्वतिदुर्लभे प्रवहति स्वानन्द उद्रोधसि।
भक्तिं तां परमामवाप्नुम तथानावृत्तसेवाप्तये
मेदिन्यां तु लभामहे विधिबलोत्कर्षान्निवासं परम्॥ **21.2** ॥

श्रीमते निगमान्तमहादेशिकाय नमः

गुरुस्त्रय्यन्तार्यः परमपदसोपानमिति याः
हिताय व्यातेने द्रविडगिरि गाधास्सुमनसाम्।
विपश्चित् गोपालो व्यवृणुत च कर्णाटकगिरा
सुरोक्त्या च श्लोकीचकर परयाचार्यकृपया॥

॥ इति परमपदसोपानं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥